
वर्षम्-१ अङ्कः-१

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११० वैक्रमाब्दः २०६५ आषाढकृष्ण१३ – आश्विनशुक्लप्रतिपत् शकः १९३० जुलाई-सितम्बर २००८



**अर्जुन सिंह**
ARJUN SINGH

**मानव संसाधन विकास मंत्री**
**भारत**
**नई दिल्ली-110 115**

MINISTER OF
HUMAN RESOURCE DEVELOPMENT
INDIA
NEW DELHI-110 115

## सन्देशः

राष्ट्रिय-संस्कृत-संस्थानम्, मानितविश्वविद्यालयः भारतराष्ट्रस्य बृहत्तमः संस्कृतविश्वविद्यालयः वर्तते। अस्य दश परिसराः जम्मूकश्मीरेषु जम्मूनगरे, राजस्थानेषु जयपुरे, उत्तरप्रदेशेषु लखनऊ-प्रयागयोः, उड़ीसासु पुर्याम्, कर्नाटेषु शृङ्गगिरौ, केरलेषु पुरनाट्टुकरानगरे, मध्यप्रदेशेषु भोपालनगरे, महाराष्ट्रेषु मुम्बय्यां स्थिताः सन्ति। समग्रेऽपि राष्ट्रे संस्कृतविषयक-कार्यक्रमाणां सञ्चालने, नियमने, व्यवस्थापने च अस्याः संस्थायाः महती भूमिका वर्तते। सर्वत्र परिसरेषु देहलीस्थे मुख्यालये च प्रतिक्षणं संस्कृतभाषासाहित्यस्य अधीतिबोधाचरणप्रचारणविषयाः कार्यक्रमाः अध्यापकैः छात्रैः अथ च अधिकारिभिः कर्मचारिभिश्च आयोज्यन्ते। तेषां शैक्षिक-सांस्कृतिक-हृदयावर्जकज्ञानवर्धककर्मणां विज्ञापनं विश्वस्मिन् सर्वत्र स्यादिति धिया संस्कृतभाषायां त्रैमासिक्याः वार्ता-पत्रिकायाः प्रकाशनारम्भः संस्थानेन क्रियते इति प्रमोदस्य विषयः।

प्रकाशनमिदं वर्तमानसमये संस्कृतस्य उपादेयतायाः बोधाय राष्ट्रियसंस्कृतसंस्थानस्य गतिविधिषु च नवीनतायाः सार्थकदिशि उन्मीलनाय अलं स्याद् इति आशासे।

(अर्जुन सिंह)

**मुख्यसम्पादकः**

प्रो. राधावल्लभः त्रिपाठी

कुलपतिः

रा.सं.संस्थानम्, नवदेहली

**सम्पादकमण्डलम्**

डॉ. शुक्ला मुखर्जी

डॉ. सविता पाठकः

डॉ. प्रकाशपाण्डेयः

डॉ. रत्नमोहनः झा

कु. वेङ्कटेशमूर्तिः

**सहयोगिनः**

परिसरप्राचार्याः

डॉ. हिन्दकेसरी, जयपुरम्

डॉ. एन्. आर्. कण्णन्, लखनऊ

डॉ. जि. गङ्गन्ना, पुरी

डॉ. कमलचन्द्रयोगी, मुम्बई

प्रो. रामानुजदेवनाथः, शृङ्गेरी

प्रो. विश्वमूर्तिशास्त्री, जम्मू

प्रो. सुरेन्द्रझाः, गरली

प्रो. प.ना. शास्त्री, भोपालम्

डॉ. शैलकुमारी मिश्रा, इलाहाबादम्

प्रो. के.टी. माधवन्, गुरुवायूरुः

विषयानुक्रमः


**शुभसन्देशः** 01

**सम्पादकीयम्** 02

**प्रतीकचिह्नरहस्यम्** 03

**मुख्यालयवार्ताः** 03

**संस्कृतसप्ताहोत्सववार्ता** 07

**परिसरगतिविधयः** 14



प्रकाशकः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,

नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in

website : www.sanskrit.nic.in


सम्पादकीयम्

## संस्थानम् – लघुभारतमेकम्

अस्माकं देशे साकल्येन चतुर्दश संस्कृतविश्वविद्यालयाः सन्ति। भारताद् बहिः नेपालदेशे एकः संस्कृतविश्वविद्यालयो वर्तते। एतेषु सर्वेषु संस्कृतविश्वविद्यालयेषु आकारेण, अध्यापकानां छात्राणां च संख्यया राष्ट्रियसंस्कृतसंस्थानं महत्तमो विश्वविद्यालयः। समग्रे भारते अस्य दश परिसराः राजन्ते। तस्माद् बहुपरिसरमयः अयमेक एव संस्कृतविश्वविद्यालयः। भारतस्य विविधप्रान्तेषु अवस्थितेभ्यः स्वपरिसरेभ्यः पारम्परिकसंस्कृतशिक्षणं पोषयद् भारतीयविद्याया नव्यमयतनं च विकासं लक्ष्यीकुर्वद् भारतस्य वैविध्यमयसंस्कृतेः प्रातिनिध्यं वहत् राष्ट्रियसंस्कृतसंस्थानं वस्तुत एकं लघुभारतमेव वर्तते।

संस्थानस्य विभिन्नप्रान्तस्थिताः दश परिसराः दशसु दिक्षु संस्कृतस्य विस्तारं सूचयन्ति। एतेषु परिसरेषु सप्त परिसराः सुनिर्मितैः प्रशस्तैर्भवनैः छात्रावासादिव्यवस्थया च विशिष्यन्ते। भोपाल-गरली-मुम्बई-नगरेषु अवस्थितानां त्रयाणां परिसराणां भवनानि निर्माणाधीनानि सन्ति। भोपाले गरल्यां च भाटकेन गृहीतेषु भवनेषु कार्यं प्रचलति, तथैव मुम्बई-परिसरेऽपि संस्थानस्य स्वीयानि भवनानि न सन्ति। इमे त्रयः परिसरा अपि यथाशीघ्रं स्व-स्व-भवनैः समुचितैरुपकरणैश्च समृद्धाः स्युरिति आशास्महे तत्कृते च यथोचितं यतामहे।

राष्ट्रियसंस्कृतसंस्थानं 1970 तमे ख्रीष्टाब्दे स्थापितम्। अक्टोबरमासे पञ्चदशे दिनाङ्के अस्माभिरस्याः संस्थायाः स्थापनादिवस आयोज्यते। सम्प्रति संस्थानान्तर्वर्तिनः केचन परिसराः मूलतया संस्कृतविद्यालयादिरूपेण स्थापिताः एतस्मादपि प्राचीनतराः। एवमेव बहवः आदर्शमहाविद्यालया द्वे आदर्शशोधसंस्थाने च संस्थानद्वारा प्रदत्तेन साहाय्येन कार्यरतानि सन्ति। एताभिर्महतीभिः संस्थाभिः समन्वितस्य राष्ट्रियसंस्कृतसंस्थानस्य साम्प्रतिके नूतने सहस्राब्दे का स्वप्नदृष्टिः, किं ध्येयं किं च लक्ष्यं भवेदिति चिन्त्यम्। अस्मिन् विषये समेषां सुधियां विचारा आमन्त्र्यन्ते।

अथ संस्कृतपालिप्राकृतभाषाणां तासां साहित्यस्य ताभिः प्रवर्तितानां परम्पराणां च संरक्षणाय भारतशासनेन प्रवर्तितानां कासाञ्चिद् योजनानां प्रवर्तनायापि इदं संस्थानं माध्यमभूतम्। तस्मात् संस्थानस्य विविधकार्यक्रमाणां प्रचाराय विविधपरिसरेषु अध्यापनं कुर्वद्भ्यः शिक्षकेभ्यः तत्र अधीयानेभ्यः छात्रेभ्यः संवादं विधातुं वार्तापत्रमेकम् अपेक्षितमासीत्। 'संस्कृतवार्ता' अस्यां दिशि अस्माकं विनम्रः प्रयासः।

संस्कृतवार्तायाः प्रत्येकम् अङ्कः प्रत्ययतां पोषयेत्, संस्कृतस्य नित्यं नवायमानं सामर्थ्यं च प्रकटीकुर्यात् इति धिया अस्य वार्तापत्रस्य प्रकाशने समस्तसंस्कृतजगतः सहयोगं काङ्क्षामहे।

(राधावल्लभत्रिपाठी)

## अस्माकं छात्रसम्पत्तिः (2008-2009)

| परिसराः | छात्राः | | छात्र्यः | | |
|---|---|---|---|---|---|
| मुम्बई | 100 | + | 6 | = | 106 |
| लखनऊ | 195 | + | 62 | = | 257 |
| भोपालम् | 257 | + | 27 | = | 284 |
| शृङ्गेरी | 218 | + | 97 | = | 315 |
| गुरुवायूरुः | 97 | + | 221 | = | 318 |
| गरली | 188 | + | 177 | = | 365 |
| जम्मू | 338 | + | 46 | = | 384 |
| पुरी | 249 | + | 435 | = | 684 |
| जयपुरम् | 663 | + | 95 | = | 758 |
| **योगः –** | 2,305 | + | 1,166 | = | **3,471** |

## राष्ट्रियसंस्कृतसंस्थानस्य प्रतीकचिह्नरहस्यम्

अथ बाह्यतः अन्तःक्रमेण राष्ट्रियसंस्कृतसंस्थानस्य प्रतीकमुद्रायाः रहस्यं व्याख्यास्यामः। आदौ चतुरस्रत्रयं, तच्च क्रमेण लोहितशुक्लकृष्णं रजस्-सत्त्व-तमसां गुणानां ब्रह्माण्डस्य आत्मभूतगुणानां व्यञ्जकमस्ति। तादृशत्रिगुणात्मकप्रपञ्चे सत्त्वभूयिष्ठं रजोगुणयुक्तमस्माकं संस्थानमिति पूर्वोक्त-चतुरस्रान्तर्वर्ति-श्वेतरक्तचतुरस्रद्वयं व्यनक्ति। ततोर्ध्वकोष्ठे- **'योऽनूचानः स नो महान्'** इति ध्येयवाक्यं प्रज्ञानब्रह्मणोऽभिव्यञ्जकम्। मण्डलस्य वामभागे त्रिगुणव्यञ्जिकाः लोहितशुक्लकृष्णरेखाः क्षुब्धतरङ्गवद् ऊर्ध्वाधःक्रमेण प्रवर्तिताः। ताश्च ब्रह्मणः संयोगात् क्षुब्धप्रकृतेः विश्वाकाराभिव्यक्तिप्रक्रियां सिसृक्षां वा प्रतिपादयन्ति। अभिव्यक्ते विश्वस्मिन् **राष्ट्रिय-संस्कृत-संस्थानम्** संस्कृतप्रचारेण व्यापनशीलं स्वकीयां प्रभां सर्वत्र विकासयत् मूलस्थकोष्ठे विराजते इति प्रतिपादितं भवति। मण्डलस्य दक्षिणभागे पुनः त्रिगुणवर्णात्मिका रेखा विपरीतक्रमेण ऊर्ध्वगामिन्यः प्रवर्तिताः ताश्च स्व-लक्ष्यभूतं प्रज्ञानं ब्रह्म प्रति जिगमिषवः संस्थानस्य लक्ष्यं प्रतिपादयन्ति। केन्द्रे सूर्याभिमुखं श्वेतपत्रात्मकं सत्त्वगुणोपेतं पुष्पं संस्थानस्य सर्वतोभावेन ऋतानुकूलस्वभाववत्त्वं व्यनक्ति। पुष्पवृन्तलग्नं श्वेतपत्रयुगलं अभ्युदय-निःश्रेयसरूपं धर्मस्य तत्त्वं व्यनक्ति। एवमस्माकं प्रतीकमण्डलं मुद्रा वा अस्याः संस्थायाः मूलस्वभावस्य कार्यस्य च परिचायकमस्तीति विज्ञाप्यते।

### विद्यावारिधिशोधार्थिनां कृते अनुसन्धानप्रविधौ पाण्डुलिपिविज्ञाने च प्रशिक्षणम्

विद्यावारिधये अनुसन्धानरतः प्रत्येकं शोधच्छात्रः त्रिसप्ताहावधिके पुनश्चर्यापाठ्यक्रमे अनुसन्धानप्रविधेः पाण्डुलिपिविज्ञानस्य च प्रशिक्षणं प्राप्नुयादिति निर्णयः 17-9-08 तमे दिनाङ्के समायोजिते प्रबन्धमण्डलस्य उपवेशने गृहीतः।

पुनश्चर्यापाठ्यक्रमाणामायोजनं संस्थानेन करिष्यते। प्रथमः पुनश्चर्या-पाठ्यक्रमः मध्यप्रदेशस्य सागरस्थितस्य - डॉ. हरिसिंहगौर-विश्वविद्यालयस्य पाण्डुलिपिसंसाधनकेन्द्रे आचार्यस्य अच्युतानन्ददाशस्य संयोजकत्वे नवम्बरमासे आयोजयिष्यते।



*विकासमुखी दृष्टिः*

## प्रबन्धमण्डलस्य उपवेशनं सम्पन्नम्

राष्ट्रियसंस्कृतसंस्थानस्य प्रबन्धमण्डलं 17-9-08 तमे दिनाङ्के मिलितवत्। तत्र इमे अभिनवाः उपक्रमाः स्वीकृताः–

- संस्थानं यथा संस्कृतस्य तथा पालिप्राकृतभाषयोः समुन्नयनायापि प्रयत्नपरः स्यात्।
- संस्थानस्य सर्वेषु परिसरेषु विद्यमानानां दुर्लभग्रन्थानां हस्तलिखितपुस्तकानां इलैक्ट्रोनिकरूपमुद्रणम् (डिजिटाइजेशन्) करिष्यते।
- राष्ट्रियसंस्कृतसंस्थानस्य दिल्लीपरिसरः संवर्धनीयः, तत्र अधोलिखिताः उपाधि (Diploma)-पाठ्यक्रमाश्च चालनीयाः–
  - सांस्कृतिकपर्यटने उपाधिपाठ्यक्रमः
  - नाट्यशास्त्रे उपाधिपाठ्यक्रमः
  - सङ्गणकीयसंस्कृते उपाधिपाठ्यक्रमः
  - आयुर्वेदिकौषधिविज्ञाने उपाधिपाठ्यक्रमः
  - प्राकृतभाषायां उपाधिपाठ्यक्रमः
  - पालि-बौद्धदर्शनयोः उपाधिपाठ्यक्रमः
  - ज्योतिषे उपाधिपाठ्यक्रमः
  - वास्तुशास्त्रे उपाधिपाठ्यक्रमः
- संस्थानेन अधोलिखितकेन्द्राणां/विभागानां स्थापनाऽपि करिष्यते–
  - महिलाध्ययनकेन्द्रम्
  - नवाचारपरक-व्यावसायिकसंस्कृतशिक्षाविभागः
  - युवकल्याण-सांस्कृतिकगतिविधिविभागः
  - केन्द्रीयसंस्कृतपुस्तकालयः ई-पुस्तकालयश्च
- ई-कोशागारस्य ई-प्रशिक्षणस्य च उपक्रमः–

  संस्कृते सङ्गणकदृष्ट्या क्रियमाणस्यानुशीलनस्य अद्यत्वे महत्त्वं निर्विवादम्। राष्ट्रियसंस्कृतसंस्थानं सङ्गणकमाध्यमेन संस्कृतभाषायाः शास्त्राणां साहित्यस्य च अनुसन्धानाध्ययनयोः विकासाय काश्चन शोधयोजनाः अङ्गीकृतवत्। तासु ई-कोशागारस्य स्थापना ई-प्रशिक्षणस्य च उपक्रमः सद्यः स्यात्।

### भविष्यन्ति स्मृतिव्याख्यानमालाः

मुख्यालये – सर्वपल्लिराधाकृष्णन्-स्मृतिव्याख्यानमाला
जयपुरे – म.म. मधुसूदन ओझा-स्मृतिव्याख्यानमाला
कोलकातायाम् – गौरीनाथशास्त्रि-स्मृतिव्याख्यानमाला
चेन्नय्याम् – डा. वी. राघवन्-स्मृतिव्याख्यानमाला
इलाहाबादे – आचार्यमण्डनमिश्र-स्मृतिव्याख्यानमाला

एतासु व्याख्यानमालासु प्रतिवर्षं एकैकं व्याख्यानं सूचितेषु परिसरेषु आयोजयिष्यते। लखनऊ-परिसरे 14.10.08 दिनाङ्के म.म. गोपीनाथकविराजस्मृतिव्याख्यानमालायां 'आगमेषु विश्वदृष्टिः' इति विषयमधिकृत्य आचार्यस्य कमलेशदत्तत्रिपाठिवर्यस्य व्याख्यानं भविष्यति।

## राष्ट्रपतिना विद्वांसः सम्मानिताः

नवदेहल्यां 10-8-08 दिनाङ्के राष्ट्रपतिभवने 2007 तमे वर्षे राष्ट्रपतिपुरस्काराय घोषितानां विदुषां कृते प्रमाणपत्रप्रदानाय विशिष्टः समारोहः आयोजितः । तस्मिन् कार्यक्रमे भारतस्य महामहिम-राष्ट्रपतिः श्रीमती प्रतिभादेवीसिंहपाटिल-महोदया 15 संस्कृतविदुषां कृते, एकस्मै पाली/प्राकृतविदुषे, त्रिभ्यः अरेबिक्-विद्वद्भ्यः, त्रिभ्यः पर्सियन् विद्वद्भ्यः, एकस्मै युवसंस्कृतविदुषे च प्रमाणपत्राणि व्यतरत् ।



राष्ट्रपतिमहोदयया सह मानवसंसाधनविकासमन्त्रालयस्य राज्यमन्त्री श्रीमती डि. पुरन्देश्वरी, शिक्षासचिवः श्री आर्.पी.अग्रवालः, संयुक्तसचिवा (भाषा) श्रीमती डा. अनिता जैन भटनागर, भाषानिदेशिका श्रीमती रीता चटर्जी, अन्ये अधिकारिणः, पुरस्कृताः विद्वांसश्च।

## आगामिनः विशिष्टकार्यक्रमाः

- संस्थानस्य **स्थापनादिवसः** अक्टूबरमासस्य 15 दिनाङ्के संस्थानमुख्यालये सम्पत्स्यते । अस्मिन् अवसरे संस्थानस्य संस्थापकनिदेशकस्य आचार्यस्य रामकरणशर्ममहाभागस्य सम्मानः, आचार्यनामवरसिंहस्य 'संस्कृत-हिन्द्योरन्तःसम्बन्धः' इति विषयमधिकृत्य व्याख्यानं च भविष्यति ।
- ऐषमः **कौमुदीमहोत्सवः** नवम्बरमासस्य 24, 25, 26 दिनाङ्केषु नवदेहल्यां भविता । कार्यक्रमस्थानस्योद्घोषणं पश्चात् भविष्यति ।
- राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् आयोज्यमानाः **अखिलभारत-संस्कृतशास्त्रीयवाक्स्पर्धाः** अस्मिन् वर्षे पुर्यां श्री सदाशिवपरिसरे दिसम्बरमासस्य 23 तः 25 पर्यन्तं भविष्यति । स्पर्धासु साहित्य-व्याकरण-ज्यौतिष-वेदान्त-मीमांसा-सांख्ययोग-धर्मशास्त्र-विषयेषु भाषणस्पर्धा, अन्त्याक्षरी, समस्यापूर्तिः, व्याकरण-साहित्य-न्यायशास्त्रेषु निर्दिष्टग्रन्थेषु शलाकापरीक्षा, अष्टाध्यायीसूत्रपाठस्पर्धा च अन्तर्भवन्ति । भाषणस्पर्धानां समस्यापूर्तेः च विषयाः स्पर्धास्थाने निर्दिष्टावधेः पूर्वम् उद्घोषिताः भविष्यन्ति । अधोनिर्दिष्टाः शलाकापरीक्षाविषयास्तु गतवर्षस्य अ.भा. वाक्स्पर्धासमारोहस्य समापनसमारोहे बेङ्गलूरुनगरे उद्घोषिताः आसन्–

  व्याकरणे – "भट्टोजीदीक्षितकृत-वैयाकरणसिद्धान्तकौमुद्याम् उत्तरार्धे आत्मनेपदप्रकरणमारभ्य ग्रन्थसमाप्तिपर्यन्तं (वैदिकप्रक्रियां वर्जयित्वा) ।"

  न्याये – केशवमिश्रकृता तर्कभाषा सम्पूर्णा

  साहित्ये – भोजराजकृतं "चम्पूरामायणम्" (बाल-अयोध्या-सुन्दरकाण्डाः)

# कुलपतेः दैनन्दिनी

14-08-2008 – संस्थाने कुलपतेः कार्यभारग्रहणम् ।

16-08-2008 – संस्कृतदिवसमुपलक्ष्य भारतशासनस्य मानवसंसाधनविकासमन्त्रालयस्य, राष्ट्रियसंस्कृतसंस्थानस्य, श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य च संयुक्ततत्त्वावधाने नवदेहल्यां राष्ट्रियसङ्ग्रहालये समायोजितसमारोहे विशिष्टव्याख्यानम् ।

21-08-2008 – संस्कृतसप्ताहाङ्गतया संस्थानमुख्यालये आयोजितस्य कविसपर्या-कार्यक्रमस्य आध्यक्ष्यम् ।

22-08-2008 – संस्कृतसप्ताहोत्सवे मुख्यालये विद्वत्सपर्याकार्यक्रमस्य आध्यक्ष्यम् ।

23-08-2008 – नवदेहलीस्थ-देववाणीपरिषदा संस्थाने आयोजिते अभिनवशुक्लप्रणीतशोधग्रन्थ- लोकार्पणावसरे मुख्यातिथित्वम् ।

25-08-2008 – नवदेहल्यां ज.ने.विश्वविद्यालये 'भाषासिद्धान्तः' इति विषये विशिष्टव्याख्यानम् ।



चित्रे दृश्यन्ते आचार्याः राधावल्लभत्रिपाठी, पूज्य श्री मोरारीबापू अन्ये च

26 तः 28-08-2008 – वि.वि.अ.आयोगस्य (U.G.C) एकादश-योजनासमितिसदस्यत्वेन श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य निरीक्षणम् ।

02-09-2008 – गुर्जरप्रदेशस्थित-कैलासगुरुकुलेन ''पौराणिक-पात्राणि" इति विषये समायोजितायाः संगोष्ठ्याः उद्घाटनभाषणं प्रदत्तं यत्र महात्मा मोरारीबापू-महोदयः उपस्थितः आसीत् ।

03-09-2008 – महात्मना मोरारीबापूमहोदयेन सम्मानितः ।

05-09-2008 – वाराणसेयकाशी-हिन्दू-विश्वविद्यालये शिक्षक-दिवससमारोहे मुख्यातिथिरूपेण आचार्यत्वेन च तत्रत्यकुलपतिना प्रो. डी.पी.सिंहमहोदयेन सम्मानितः ।



राधाकृष्णन्-स्मृति-पुरस्कारं प्राप्नुवन् कुलपतिः राधावल्लभत्रिपाठी

06-09-2008 – 'दिल्ली शिक्षा ग्राम खेल विकास सङ्घ' एवं 'हेल्दी युनिवर्स फाउण्डेशन, नव देहली' इति संस्थाभ्यां नवदेहल्यां संविधानसङ्घस्य सभापतिभवने आयोजिते समारोहे 2008 वर्षस्य 'डा. राधाकृष्णन् स्मृति-'पुरस्कारेण सभाजितः ।

06-09-2008 – 'दिल्लीपुस्तकमेला' इत्यत्र रा.सं.संस्थानस्य विक्रयकेन्द्रं सन्दृष्टम् ।

08 तः 09-09-2008 – वि.वि.अ.आयोगस्य (U.G.C.) एकादशयोजना-समितेः सदस्यत्वेन पुरीस्थस्य श्री जगन्नाथसंस्कृत-विश्वविद्यालयस्य निरीक्षणम् ।

10-09-2008 – रा.सं.संस्थानस्य पुरीस्थ-सदाशिवपरिसरे छात्राणाम्, अध्यापकानाम् अनुसन्धातॄणां च उद्बोधनम् । श्री जगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः, तिरुपतिस्थ- रा.सं.विद्यापीठस्य कुलपतिः च उपस्थितौ आस्ताम् ।

19-09-2008 – नवदेहल्यां 'राष्ट्रिय-शैक्षिक-अनुसन्धान एवं प्रशिक्षण परिषद्' (N.C.E.R.T.) इत्यत्र शिक्षकप्रशिक्षणकार्यशालायाः समापने मुख्यातिथित्वम् ।

| | | |
|---|---|---|
| 20-09-2008 | – | रा.सं.संस्थानेन, उज्जयिनीस्थ-कालिदास-अकादम्या च इन्दौर-नगरे आयोजितस्य त्रिदिवसीय-संस्कृतनाट्य-समारोहस्य उद्घाटनम् । |
| 22-09-2008 | – | संस्थानस्य भोपालपरिसरनिरीक्षणम्, केन्द्रीयलोकनिर्माणविभागस्य (C.P.W.D.) मुख्य-अभियन्त्रा सह परिसरस्य नवीनभवननिर्माणकार्यस्य प्रगतिविषये समीक्षणं च । |
| 23-09-2008 | – | नवदेहल्यां भारतीय-दार्शनिकानुसन्धानपरिषदि (I.C.P.R.) हिन्दी सप्ताहोत्सवस्य उद्घाटने मुख्यातिथित्वम् ।<br>नवदेहल्यां साहित्य-अकादम्या स्वीयसभागारे समायोजितस्य हिन्दीपक्षमहोत्सवस्य समापने मुख्यातिथित्वम् । |
| 26-09-2008 | – | इन्दिरागान्धीराष्ट्रियकलाकेन्द्रे (I.G.N.C.A.) तत्त्वबोधव्याख्यानमालाकार्यक्रमे (व्याख्यानकर्ता प्रो. वागीशशुक्लः) आध्यक्ष्यनिर्वहणम् । |
| 27-09-2008 | – | दिल्ली-विश्वविद्यालयस्य दक्षिणपरिसरे (South Campus) WAVE (World Association for Vedic Education/[illegible]) इति संस्थया आयोजितकार्यक्रमे व्याख्यानप्रदानम् । |

## प्राच्यविद्यासम्मेलने संस्थानस्य प्रातिनिध्यम्

प्रतिवर्षद्वये एकवारं भारते आयोज्यमानम् अखिलभारतीयप्राच्यविद्यासम्मेलनं प्रकृतवर्षे कुरुक्षेत्रविश्वविद्यालये समपद्यत। तत्र सम्मेलनाङ्गभूतायाः पण्डितपरिषदः प्रायोजनं राष्ट्रियसंस्कृतसंस्थानेन कृतमासीत्। समग्रे सम्मेलने विविधविषयकगोष्ठीषु शोधपत्रवाचनसत्रेषु, गभीरशास्त्रार्थविचाराय समायोजितपण्डितपरिषदि च अधोनिर्दिष्टानां संस्थानपरिवारसदस्यानां भागग्रहणेन संस्थानस्य प्रातिनिध्यं प्रस्फुटम् अभवत् ।

### पण्डितपरिषदि

| | | | |
|---|---|---|---|
| 1. | प्रो. इन्द्रमणिदासः, ज्यौतिषिक, जम्मू | 10. | प्रो. अर्कनाथचौधरी, वैयाकरणः, जयपुरम् |
| 2. | डा. वैद्यनाथझा, नैयायिक, जम्मू | 11. | डा. के.पी. केशवन्, साहित्यिक, जयपुरम् |
| 3. | डा. हरिनारायणतिवारी, वैयाकरणः, जम्मू | 12. | डा. विजयपालशास्त्री, साहित्यिक, जयपुरम् |
| 4. | प्रो. रामनारायणदासः, वैयाकरणः, गरली | 13. | डा. ई.एम्. राजन्, साहित्यिक, शृङ्गेरी |
| 5. | डा. रामकुमारशर्मा, साहित्यिकः, गरली | 14. | डा. सी.एस्.एस्. नरसिंहमूर्तिः, वैयाकरणः, शृङ्गेरी |
| 6. | डा. सुबोधकुमारशर्मा, वैयाकरणः, गरली | 15. | डा. सुब्राय वि.भट्टः, मीमांसक, शृङ्गेरी |
| 7. | डा. अशोकचन्द्रगौडशास्त्री, वैयाकरणः, गरली | 16. | डा. रामचन्द्रुलवालाजी, नैयायिक, शृङ्गेरी |
| 8. | डा. बटोही झाः, साहित्यिक, लखनऊ | 17. | डा. गणेश-ईश्वरभट्टः, अद्वैतवेदान्ती, शृङ्गेरी |
| 9. | डा. हिन्दकेसरी, वैयाकरणः, जयपुरम् | 18. | डा. व्रजभूषणओझाः, वैयाकरणः, भोपालम् |

### विविधसत्रेषु

| | | | |
|---|---|---|---|
| 1. | डा. विद्यानन्दझाः, साहित्यिक, जम्मू | 8. | डा. अतुलकुमारनन्दः, पुरी |
| 2. | डा. जयप्रकाशनारायणः, साहित्यिक, जम्मू | 9. | डा. उदयनाथझाः, साहित्यिक, पुरी |
| 3. | डा. नागेन्द्रनाथझाः, शिक्षाशास्त्री, जम्मू | 10. | डा. महेशझाः, नैयायिक, पुरी |
| 4. | श्री रमेशसिंहः, शारीरिकशिक्षक, जम्मू | 11. | डा. रत्नमोहनझाः, साहित्यिक, नवदेहली |
| 5. | कु. नीतू शर्मा, साहित्यिका, जम्मू | 12. | डा. विजयकुमारजैनः, बौद्धदार्शनिक, लखनऊ |
| 6. | श्री भगवान्, शिक्षाशास्त्री, जम्मू | 13. | डा. लक्ष्मीनिवासपाण्डेयः, शिक्षाशास्त्री, लखनऊ |
| 7. | डा. सुरेशपाण्डेयः, अनुसन्धानसहायक, जम्मू | | |

**न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः।**

**ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान्॥** (म.भा. शल्यपर्व 50.47)

मानवस्य महत्ता वयसा, केशपालित्येन, धनेन, बन्धुवर्गेण च न परिगण्यते। ऋषिभिर्व्यवस्था कृता यत् अस्मासु यः अध्ययनशीलः (वेदवेदाङ्गतत्त्वज्ञः) स एव महान् भवतीति।

# सफलतया सम्पन्नः संस्कृतसप्ताहोत्सवः



वामतः-वाचस्पत्युपाध्यायः, श्रीमती रीता चटर्जी, पूर्वन्यायाधीशः पी.एन्. भगवती, लोकेशचन्द्रः, राधावल्लभत्रिपाठी च

राष्ट्रियसंस्कृतसंस्थानेन 14-08-2008 तः 22-08-2008 पर्यन्तं विभिन्नराज्यस्थितेषु स्वीयपरिसरेषु नवदेहल्यां च ऐषमः संस्कृतसप्ताहोत्सवः समनुष्ठितः। श्रावणपूर्णिमादिनं केन्द्रीकृत्य ततः पूर्वं परं च कतिचन दिनानि समग्रदेशे बह्वीभिः संस्थाभिः संस्कृतसप्ताहावसरे संस्कृतकार्यक्रमाः आयोज्यन्त इति सर्वविदितमेव। राष्ट्रराजधान्यां नवदेहल्यां तु संस्कृतसप्ताहाङ्गभूतः संस्कृतदिवससमारोहः मानवसंसाधन-विकासमन्त्रालयस्य, राष्ट्रियसंस्कृतसंस्थानस्य, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य च संयुक्ततत्त्वावधाने सम्पन्नः। 16-8-2008 दिनाङ्के राष्ट्रियसंग्रहालये प्रवृत्ते अस्मिन् कार्यक्रमे भूतपूर्वन्यायाधीशः श्री पी. एन्. भगवतीमहोदयः, राष्ट्रपतिपुरस्कारेण सम्मानितः प्रखरविद्वान् श्री लोकेशचन्द्रमहोदयः, मानवसंसाधनविकास-मन्त्रालयस्य भाषानिदेशिका श्रीमती रीता चटर्जी च विशेषेण समुपस्थिताः आसन्। कार्यक्रमे ला.ब.शा.रा.सं. विद्यापीठस्य कुलपतिः आचार्यः वाचस्पत्युपाध्यायवर्यः सभां सम्बोधयन् श्रावणपूर्णिमायाः सांस्कृतिकमहत्त्वं, संस्कृतदिवसाचरणस्य आवश्यकतां च सुष्ठु न्यरूपयत्। सारस्वतातिथिरूपेण सम्मानितः, राष्ट्रपतिपुरस्कारभाक्, पञ्चशताधिक-ग्रन्थप्रणेता, बह्वीषु भाषासु विहितश्रमः, संसत्सदस्यत्वेन कृतकार्यः संस्कृतसेवी विद्वान् लोकेशचन्द्रमहोदयः चीनदेशे दक्षिणपूर्व-एशियादेशेषु च संस्कृतभाषाप्रभावस्य सुदीर्घेतिहासं सोदाहरणं निरूपितवान्। तेन इदं प्रतिपादितं यत् चीनदेशस्य समृद्धौ अभ्युत्थाने च संस्कृतस्य भूमिका वर्तते।

मुख्यातिथित्वेन समायातः न्यायाधीशवरः श्री पी.एन्. भगवतीमहोदयः स्वीयभाषणे संस्कृतवाङ्मये निहितानां वैश्विकसद्भावनानां विषये सविवरणमुद्बोध्य आधुनिककाले संस्कृतस्य प्रासङ्गिकता विद्यते इति निरूपितवान्। भाषणावसरे सः – "पिरमिड् मरुमारुतैः ध्वस्तानि, भूकम्पैः मार्बल्-शिलाः खण्डिताः, चोरैः स्वर्णमपहृतं च अभवत्, किन्तु अविच्छिन्न-श्रुतिपरम्परया सुरक्षिताः वेदाः अनुदिनम् उच्चार्यमाणाः सन्ति" इति केनचित् जर्मन्देशीयविदुषा उक्तानि वचनानि च स्मारितवान्।




कविसपर्या-कार्यक्रमे अभिराजराजेन्द्रमिश्रः, राधावल्लभत्रिपाठी, रमाकान्तशुक्लः, हर्षदेवमाधवः च

संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः स्वीयभाषणे मातृवत् संसेव्यां संस्कृतवाणीं संवर्ण्य विशिष्टैः वचनैः, कतिपयैः पद्यैश्च संस्कृतकार्यं प्रति सर्वेषां श्रद्धाभावम् अजागरयत्। विभिन्नसंस्थाभ्यः समागताः प्रतिनिधयः, संस्कृताध्यापकाः, आचार्याः, संस्कृतच्छात्राः सहृदयाश्च भूरिसंख्यया कार्यक्रमे समवेताः आसन्।

### संस्कृतकविसपर्या विद्वत्सपर्या च

संस्कृतसप्ताहाङ्गतया संस्थानमुख्यालयभवने अगस्त 20, 21 दिनाङ्कयोः कविसपर्या विद्वत्सपर्या च समभवत्। 20 दिनाङ्के कविसपर्यायां श्रीमन्तं डा. रमाकान्तशुक्लमहोदयम् अधिकृत्य तत्कृतीः अधिकृत्य च आचार्येण अभिराजराजेन्द्रमिश्रमहोदयेन, आचार्य-हर्षदेवमाधवेन, डा. इच्छारामद्विवेदिवर्येण, डा. मञ्जुलताशर्ममहाभागया, आचार्येण हरिदत्तशर्म-महाभागेन, आचार्येण राधावल्लभत्रिपाठिवर्येण च विश्लेषणात्मकाः स्वीयस्वीयाभिप्रायाः प्रस्तुताः। संस्थानकुलपतिना सभाध्यक्ष्यं निर्व्यूढम्, सम्मान्यः कविवरः अभिनन्दितः सम्मानितश्च।

21 दिनाङ्के विद्वत्सपर्यायां लब्धप्रतिष्ठः विद्वान् आचार्यः गोविन्दचन्द्रपाण्डेमहोदयः सम्मानितः अभूत्। सम्मान्यं विद्वांसं तत्प्रणीतग्रन्थांश्च अधिकृत्य बहुविधान् विचारान् प्रस्तोतुं विविधविषयेषु विहितश्रमाः आचार्याः – शल्यदेवमहोदयः, अम्बिकादत्तशर्ममहोदयः, सच्चिदानन्दमिश्रमहोदयः, वागीशशुक्लमहोदयश्च समाहूताः आसन्। तैः आचार्यगोविन्दचन्द्रपाण्डेमहोदयस्य जीवनदर्शनमधिकृत्य, वैदुष्यमधिकृत्य, विचारधारामधिकृत्य च स्वाभिप्रायः स्पष्टैर्वचोभिः व्यक्तीकृतः, बह्व्यः जिज्ञासाः च प्रकटीकृताः यासां समाधानम् अन्ते गोविन्दचन्द्रपाण्डेमहाशयेन प्रदत्तम्, उद्बोधनमपि कृतम्। उद्बोधने श्री गोविन्दचन्द्रपाण्डेमहोदयेन – 'परमार्थजिज्ञासया प्रवृत्ता दर्शनशास्त्रपरम्परा जिज्ञासा-समाधानाभ्यां, पुनः पुनः क्रियमाणेन विचारेण च निरन्तरं विकसति। परमार्थज्ञानं तु अपरोक्षानुभूत्या भवति' इत्यादिविषयप्रतिपादनपुरस्सरम् अद्वैतवेदान्त-सम्बद्धाः विशिष्टाः विषयाः स्वीयया सरल-सुबोधशैल्या प्रस्तुताः। सभाध्यक्षत्वं निर्वहन् कुलपतिवर्यः सम्मान्यविदुषः असाधारण-पाण्डित्यस्य परिचयं प्रदाय तं संस्थानपक्षतः सम्मानितवान्।




अम्बिकादत्तशर्मा, शल्यदेवः, गोविन्दचन्द्रपाण्डेयः, राधावल्लभत्रिपाठी च

## संस्कृतभाषणप्रतियोगिता, कण्ठपाठप्रतियोगिता च

संस्कृतच्छात्राणां प्रतिभां प्रोत्साहयितुं संस्थानेन संस्कृतसप्ताहावसरे सम्बद्धसंस्कृतविद्यालयानां महाविद्यालयानां छात्राणां कृते उपर्युक्तप्रतियोगिताद्वयम् आयोजितम्। बहवः छात्राः भागमगृह्णन्। विजेतारः संस्कृतसप्ताहसमारोपावसरे पुरस्कारान् प्राप्तवन्तः। कुलपतिमहोदयस्य प्रो. राधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये प्रवृत्ते पुरस्कारवितरणसमारोहे मानवसंसाधनविकासमन्त्रालयस्थः श्रीमान् विजयगोयलः, दिल्लीविश्वविद्यालयस्य आचार्या दीप्तित्रिपाठी च विशिष्टातिथिरूपेण उपस्थितावास्ताम्। अभिराजराजेन्द्रमिश्र-श्रीधरवसिष्ठ-रमाकान्तशुक्ल-प्रभृतयः विद्वांसः संस्कृतज्ञाः, संस्थानस्य विभिन्नविभागेषु कार्यरताः अधिकारिणश्च उपस्थिताः आसन्।




गोपीरमणमिश्रः, प्रकाशपाण्डेयः, विजयगोयलः, राधावल्लभत्रिपाठी, राजेन्द्रमिश्रः, श्रीमती दीप्तित्रिपाठी च

### प्रोन्नताः प्राध्यापकाः

संस्थाने कार्यरताः एते व्याख्यातारः तत्तद्विषयेषु प्रवाचकत्वेन पदोन्नतिं प्राप्तवन्तः –

1. डा. उदयनाथझाः (पुरीपरिसरः) साहित्ये
2. डा. सत्यं कुमारी (पुरीपरिसरः) न्याये
3. डा. मिनतीरथः (पुरीपरिसरः) पुराणेतिहासे
4. डा. ललितकुमारसाहूः (पुरीपरिसरः) धर्मशास्त्रे
5. डा. भारतभूषणमिश्रः (जम्मूपरिसरः) ज्योतिषे
6. डा. ईश्वरभट्टः (जयपुरपरिसरः) ज्योतिषे
7. डा. हंसधरझाः (भोपालपरिसरः) ज्योतिषे
8. डा. श्रीधरमिश्रः (जयपुरपरिसरः) व्याकरणे
9. डा. रणजीत कुमारबर्मन् (पुरीपरिसरः) अद्वैतवेदान्ते

अपि च श्री विजयपालकच्छवाहः (पुरीपरिसरः) प्रशिक्षणे, श्री किशोरकुमारदलाई (गरलीपरिसरः) साहित्ये च वरिष्ठ-व्याख्यातृत्वेण प्रोन्नतौ।

### विमर्शस्य नवोन्मेषः

राष्ट्रियसंस्कृतसंस्थानस्य शोधपत्रिकायाः 'संस्कृतविमर्शः' इत्यस्याः स्फूर्तिदाः नवीनाः अङ्काः संस्कृतजगति संस्थानेन अचिरादेव समर्पयिष्यन्ते।


## शृङ्गेर्यां राजीवगान्धीपरिसरे

**शोभायात्रा–** 18-8-08 अपराह्णे 2.30 वादने परिसरात् सर्वे अध्यापकाः छात्राश्च संस्कृतजयघोषगानपुरस्सरं शोभायात्रया श्रीशारदापीठाधीश्वराणां जगद्गुरूणां भारतीतीर्थश्रीचरणानां सन्निधानं प्राप्नुवन्। यात्रयानया संस्कृतोद्घोषैश्च सम्पूर्णं शृङ्गगिरिनगरमेव संस्कृतमयमभवत्। यात्रायां छात्राः करपत्रैः संस्कृतप्रचारं कुर्वाणाः गीतादिभिर्जनान् तोषयन्तः संस्कृतमहत्त्वं उद्घोषयन्तः संयमेन यान्ति स्म।



संस्कृत-शोभायात्रायाः दृश्यम्

**प्रारम्भोत्सवः**–श्रावणद्वितीयायाम् अपराह्णे चतुर्वादने (18-8-2008) तुङ्गातीरे नरसिंहवने गुरुभवने दक्षिणाम्नाय-शृङ्गेरी-श्रीशारदा-पीठाधीश्वराः जगद्गुरवः श्रीश्रीश्रीभारतीतीर्थमहास्वामिनः दीपज्योतिषा संस्कृतोत्सवं प्रारभन्त। गुरुवन्दनात्परं श्रीरामचन्द्र-वेङ्कटरमणयोः शान्तिमन्त्रेण, कुमार्योः भारती-नागलक्ष्म्योः मङ्गलाचरणेन च समारब्धेऽस्मिन् पवित्रकार्यक्रमे आदौ परिसरप्राचार्यः रामानुजदेवनाथः स्वागतवचोभिः साकं नवकुलपतीनां प्रणामान् श्रीचरणेभ्यो न्यवेदयत्। सन्दर्भेऽस्मिन् श्रीभारतीतीर्थमहास्वामिनः संस्कृतभाषाया महत्त्वं समुद्घाट्य संस्कृतप्रयोगाणां वैशिष्ट्यं नैकैरुदाहरणैः प्रावीकशन्। संस्कृतभाषायाः सौन्दर्यरक्षणं तद्गतविशिष्टप्रयोगाणां दैनिकव्यवहारे समानयनञ्च विदुषां कर्तव्यमित्यन्वग्रहीषुः। श्रीचरणानां अनुग्रहभाषणं हि समेषां महोत्सवाय अकल्पत।



संस्कृतसप्ताहम् उद्घाटयन्तः श्रीचरणाः

**ग्रन्थाविष्कारः**– प्रारम्भाधिवेशने परिसरव्याकरणप्राध्यापकेन डा.सि.एस्.एस्.नरसिंहमूर्तिवर्येण विरचितः 'पदचातुर्विध्यविचारः' इति, परिसरप्राध्यापकाभ्यां डा.इ.पि.श्रीदेवी-डा.गणेशईश्वरभट्टाभ्यां सम्पादितः परिसराध्यापकानां वाक्यार्थसङ्ग्रहरूपः 'वाक्यार्थभारती' इति च परिसरेण प्रकाशितौ ग्रन्थौ श्रीमहास्वामिन आविरकार्षुः। आचार्येण ए.पि.सच्चिदानन्देन प्रवर्तितेयं सभा नरसिंहमूर्तिवर्यस्य वन्दनार्पणेन मधुरवितरणेन च समाप्तिमगात्।

**स्पर्धाः**– श्रावण-तृतीयायां (19-08-2008) परिसरच्छात्रेभ्यो विविधस्पर्धाः समायोज्यन्त। ऐषमः प्रौढशालाछात्रेभ्योऽपि ऐदम्प्राथम्येन सिद्धभाषणस्पर्धा, श्रीमद्भगवद्गीताकण्ठपाठस्पर्धा च समायोजिते आस्ताम्। तस्यां प्रौढशालाविद्यार्थिनां सिद्धता भूयसी दृष्टा, उत्साहश्च भूरि प्रत्यक्षतामगात्। अत्र चिक्कमगलूरुमण्डलात् कार्कल-कोप्पा-शृङ्गेरी-कम्मारडी- हरिहरपुरोपमण्डलेभ्यः प्रौढशालाविद्यार्थिनः संस्कृताध्यापकैस्सह समागत्य स्पर्धायां भागमगृह्णन्। सिद्धभाषणस्पर्धायां शृङ्गेरीसर्वज्ञप्रौढशालाविद्यार्थी नागेन्द्रः प्रथमस्थानं, कार्कल-भुवनेन्द्रप्रौढशालाविद्यार्थिनी सुरक्षा द्वितीयं स्थानं, शृङ्गेरी-जेसीस्-प्रौढशालाविद्यार्थिनी डी.एन्.अक्षया तृतीयस्थानं च प्राप्नुवन्। श्रीमद्भगवद्गीताकण्ठपाठस्पर्धायां लक्ष्मीः (अभिनवविद्यातीर्थप्रौढशाला, शृङ्गेरी), पल्लवी भट्ट (शृङ्गेरी-सर्वज्ञप्रौढशाला), स्वाती (कार्कल-भुवनेन्द्रप्रौढशाला) च क्रमशः प्रथम-द्वितीय-तृतीयस्थानानि प्राप्य पुरस्कारभाजोऽभूवन्।

**संस्कृतसङ्कल्पः**– अपराह्णे छात्रैरुत्साहेन समायोजिते संस्कृतसङ्कल्पकार्यक्रमे विनायकरजतः संस्कृतस्य महत्त्वं प्रतिपाद्य सर्वैः संस्कृतेनैव सम्भाषणीयमिति प्रेरणादायकं भाषणमकरोत्। ततः प्राचार्यः संस्कृतसम्भाषणसङ्कल्पमकारयत्। संस्कृतसम्भाषणदीक्षारक्षाबन्धनेन कार्यक्रमः पूर्णतामगच्छत्।

**पुरस्कारवितरणम्–** दिनेऽस्मिन् अपराह्णे विजेतृविद्यार्थिनां पुरस्कारवितरणकार्यक्रमः समायोज्यत। तदवसरे जे.सि.बि.एम्. महाविद्यालयस्य आङ्ग्लप्राध्यापकः विद्वान् बहुभाषाकोविदः श्रीमान् गिरिधरशास्त्रिमहोदयः मुख्याभ्यागतरूपेण समुपस्थाय पुरस्कारवितरणं विधाय सभां सम्बोधयन् 'संस्कृतवाङ्मये निहितं वैज्ञानिकं तत्त्वं प्राकाश्यं यायात्, तत्र संस्कृतज्ञानां प्रयासो भूयोऽपेक्ष्यते, तदर्थं संस्कृतजगत् कटिबद्धं स्यात्, अस्मद्विद्या अस्माभिः संरक्षणीया' इत्यन्वग्रहीत्। प्रौढशालाध्यापकपक्षतः शृङ्गेरी-सर्वज्ञप्रौढशालासंस्कृताध्यापकः विद्वान् श्रीमहेशकारन्तवर्यः

**सांस्कृतिककार्यक्रमः**—श्रावण-चतुर्थ्यां (20-08-2008) पूर्वाह्णे छात्राः सोत्साहं विविधसांस्कृतिककार्यक्रमान् प्रास्तुवन्। छात्रैर्निरूपिताः मङ्गलनृत्यं संस्कृतगीतं प्रहसनं नटराजनृत्यमिति च कार्यक्रमाः सहृदयानां मनस्सु आह्लादकतां समजनयन्। अन्ते छात्रैः रचितायां भासवैदिकायां छात्राः ऊरुभङ्गाख्यं भासनाटिकं प्रस्तुत्य समेषां प्रशंसाभाजः अभूवन्।




ऊरुभङ्गाद् दृश्यमेकम्

**पूर्णाहुतिकार्यक्रमः**—चतुर्थ्याम् (20-8-08) अपराह्णे 2:30 वादने संस्कृतोत्सवस्य पूर्णाहुतिकार्यक्रमः समभवत्। गुरुवायूर्-परिसरस्य प्राचार्यः आचार्यः के.टी.माधवन्वर्यः मुख्याभ्यागतपदं व्यभूषयत्। गिरीश-श्रीनिवासयोर्मन्त्रोच्चारणेन, चैत्रा-विनायकयोर्मङ्गलेन च समारब्धेयं सभा डा. सूर्यनारायणभट्टेन सञ्चालिता। अवसरेऽत्र स्वागतं व्याहरत् डा. नरसिंहमूर्तिवर्यः। आचार्यः के.टी.माधवन्वर्यः विजेतृभ्यः पुरस्कारान् वितीर्य भाषाप्रान्तादिभेदान् परित्यज्य संस्कृतं सेवामहे, तद्धि राष्ट्रोत्थानसाधनं, नान्तरा संस्कृतं शान्तिरिति प्रत्यपीपदत्। एतदवसरे परिसरच्छात्रैः हृद्यः शिवनृत्यकार्यक्रमः प्रास्तावि। परिसरप्राचार्यः परिसरं संस्कृतपरिसरं विधातुं भृशं प्रयतामहे इति सन्देशं विदधानः मुख्याभ्यागतान् शालुकादिप्रदानेन समार्चयत्। आचार्यसच्चिदानन्दवर्यस्य वन्दनार्पणेन, ऐक्यमन्त्रेण च समधुरवितरणं संस्कृतोत्सवः सुसम्पन्नोऽभवत्।

## पुर्यां सदाशिवपरिसरे




सभां सम्बोधयन् शतपथीमहोदयः।
वामतः दृश्यते शत्रुघ्नपुजाहारी, वी. महान्ता च

- अगस्तमासस्य त्रयोदशदिनाङ्कतः ऊनविंशदिनाङ्कपर्यन्तं महता समारोहेण परिसरे संस्कृतसप्ताहोत्सवः परिपालितः। तत्र महोत्सवस्य उद्घाटनदिवसे पुरीमण्डलस्य मण्डलन्यायाधीशः श्रीमान् शत्रुघ्नपुजाहारीमहोदयः मुख्यातिथिरूपेण, तिरुपतिस्थस्य राष्ट्रियसंस्कृतविद्यापीठस्य माननीयः कुलपतिः आचार्यः हरेकृष्णशतपथिमहोदयः सम्मानितातिथिरूपेण च सभामलङ्कृत्य छात्रान् उदबोधयताम्। परिसरस्य प्राचार्यः श्रीगङ्गाधरमहोदयः आध्यक्ष्यं निरवहत्।
- संस्कृतसप्ताहोत्सवस्य पालनसन्दर्भे पुरीनगरीयशिक्षासंस्थाच्छात्रान् उद्दिश्य स्तरद्वये भाषण-निबन्ध- रसप्रश्नसम्बन्धिन्यः प्रतियोगिताः समायोजिताः आसन्। प्रतियोगितायां पुरीस्थस्य विद्यालयीयाः महाविद्यालयीयाश्च छात्राः सोत्साहं भागमगृह्णन्।
- संस्कृतसप्ताहस्य समापनोत्सवः परिसरे भव्यतया समायोजितः। तस्मिन् कार्यक्रमे राष्ट्रिय-अध्यापक-शिक्षापरिषदः (N.C.T.E. BBSR) निदेशकः आर्. डी.शर्ममहोदयः मुख्यातिथिरूपेण, मुजफ्फरपुरस्थस्य धर्मसमाजसर्वकारीयसंस्कृतमहाविद्यालयस्य प्राचार्यः डा.विकाउझामहाभागः च सम्मानितातिथिरूपेण सभामलमकरोत्। तस्मिन्नेव प्रसङ्गे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य आचार्यतेजपालशर्मा, आचार्यप्रभातरञ्जनमहापात्रः, सामन्तचन्द्रशेखरमहाविद्यालयस्य संस्कृतविभागाध्यक्षा डा.शारदासामन्तराय, पुरीस्थस्य केन्द्रीयविद्यालयस्य प्राचार्यः दुःशासनओझा, पुरीनगरस्थस्य जिलाविद्यालयस्य अवकाशप्राप्ताध्यापकः योगाचार्यः रमाकान्तकरः इत्यादयः प्रसिद्धाः संस्कृतविद्वांसः सम्मानिताः। विजेतृभ्यः छात्रेभ्यः पुरस्कारप्रदानमतिथिभिः कृतम्। परिसरस्य प्राचार्यः समारोहस्यास्य अध्यक्षतामकरोत्।
- परिसरस्य शिक्षाशास्त्रविभागस्य अध्यक्षेण, डा. मदनमोहनझावर्येण अस्मिन् अगस्तमासे प्रकाशितस्य पुस्तकद्वयस्य लोकार्पणं संस्कृतसप्ताहे सञ्जातम्।

## गरलीपरिसरे

अगस्तमासे 13-8-08 तः आरभ्य 19-8-08 यावत् संस्कृतसप्ताहोत्सवः आयोजितः। अगस्तमासस्य त्रयोदशे दिवसे 11 वादने स्वकीयाध्यक्षतायां सरस्वतीपूजनेन सह संस्कृतसप्ताहमहोत्सवस्य शुभारम्भं विधाय उद्घाटनभाषणं कुर्वता परिसरस्य प्राचार्येण डा. सुरेन्द्रझामहोदयेन समुपस्थितानां विदुषां प्राध्यापकानां कर्मचारिणां विद्यार्थिनां च समक्षं प्रतिपादितं यदेषां संस्कृतसप्ताहकार्यक्रमाणां प्रयोजनं लोकान् प्रति संस्कृतभाषाया महत्त्वस्य बोधनं, विद्यार्थिषु संस्कृतसम्भाषणकौशलोत्पादनं च वर्तते।

पञ्चदशे दिनाङ्के स्वतन्त्रतादिवसमहोत्सवावसरे प्राचार्येण आचार्य-सुरेन्द्रझामहोदयेन ध्वजोत्तोलनं कृतम्। छात्रैः सांस्कृतिककार्यक्रमा आयोजिताः, यत्र श्रुतिमधुराः संस्कृतगीतिकाः साहित्यवरिष्ठप्राध्यापकस्य डा. सनन्दनकुमारत्रिपाठिनः संयोजकत्वे प्रस्तुताः।

चतुर्दशदिनाङ्कादारभ्य सप्तदशं दिनाङ्कं यावत् प्राध्यापकैः डा. अशोकचन्द्रगौडशास्त्रि-विन्ध्यनाथमिश्र-उमेशचन्द्रमिश्रैः छात्रेभ्यः संस्कृतसम्भाषणप्रशिक्षणं प्रदत्तम्।

षोडशे दिनाङ्के संस्कृतदिवसावसरे पूर्वाह्णे द्विवादने प्राचार्यस्याध्यक्षतायां डा. सुबोधशर्मणः संयोजकत्वे च आचार्यरामनारायणदासेन डा. अशोकचन्द्रगौडशास्त्रिणा च व्याकरणविषयम्, डा. सनन्दनकुमारत्रिपाठिना साहित्यविषयं चाधिकृत्य शास्त्रीयं भाषणं विहितम्।

ऊनविंशतितमे दिनाङ्के पूर्वाह्णे 11 वादने वैदिकमङ्गलाचरणदीपप्रज्वालनाभ्यां प्राचार्यस्य आचार्य-सुरेन्द्रझामहोदयस्याध्यक्षतायां डा. मदनमोहनपाठकस्य संयोजकत्वे च समापनकार्यक्रमः प्रारब्धः, यत्र लखनऊपरिसरस्य पूर्वप्राचार्यः राष्ट्रपतिसम्मानितः आचार्यः उमारमणझामहोदयः मुख्यातिथिरूपेण सभामलमकरोत्। डा. मदनमोहनपाठकेन ज्यौतिषशास्त्रीयम्, प्रो. रामनारायणदास-डा. अशोकचन्द्रगौडशास्त्रिभ्यां व्याकरणशास्त्रीयम्, डा. सच्चिदानन्दतिवारिणा च साहित्यशास्त्रीयं भाषणं विहितम्। शास्त्रीयभाषणेन सह मधुरतमाः संस्कृतगीतिकाः प्रस्तुवन्तो विद्यार्थिनो दर्शकान् मन्त्रमुग्धानकुर्वन्। मुख्यातिथिः उमारमणझामहाभागः संस्कृतभाषा-वेदवेदाङ्गसाहित्यानां महत्त्वं सामयिकतां च प्रतिपादयन् पाण्डित्यपूर्णं भाषणम् अकरोत्। अध्यक्षीयभाषणे प्राचार्येण संस्कृतभाषाया महत्त्वमाश्रित्य सारगर्भं भाषणं विहितम्। राष्ट्रगीतेन संस्कृतसप्ताहोत्सवस्य सम्पूर्तिरभूत्।

## भोपालपरिसरे

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य, बरकतउल्लाविश्वविद्यालयस्य तुलनात्मकभाषासंस्कृतिविभागस्य च संयुक्ततत्त्वावधाने विश्वविद्यालयस्य समाजशास्त्रविभागीयप्रेक्षागारे संस्कृतसप्ताहोत्सवस्य उद्घाटनसमारोहः 13/08/2008 दिनाङ्के बरकतउल्लाविश्वविद्यालयस्य कुलपतेः श्रीभूपालसिंहमहोदयस्य मुख्यातिथित्वे काशीहिन्दूविश्वविद्यालयस्य धर्मविज्ञानसङ्कायस्य व्याकरण-विभागीयाचार्यस्य बालशास्त्रिमहोदयस्य सारस्वतातिथित्वे, राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य विशेषकार्याधिकारिणः आचार्यस्य परमेश्वरनारायणशास्त्रिणश्च आध्यक्ष्ये सुसम्पन्नः। तत्र परिसरीयच्छात्रैः विहितवैदिकमङ्गलाचरण-सरस्वतीवन्दनयोः पश्चात् बरकतउल्लाविश्वविद्यालयस्य तुलनात्मकभाषासंस्कृति-विभागस्याध्यक्षेण आचार्य-क्षेत्रवासिपण्डामहाभागेन वाक्पुष्पाञ्जलिभिः सर्वेषां स्वागतं व्याहृतम्। भोपालपरिसरीय-व्याकरणविभागीयप्रवाचकेन डा. बोधकुमारझा-महाभागेन धन्यवादवचनमुपन्यस्तम्। एतत्परिसरीयसाहित्यविभागाध्यक्षेण डा. सुज्ञानकुमारमोहन्तिमहोदयेन सभायाः सञ्चालनं विहितम्। एतदवसरे भोपालपरिसरपक्षतः भोपालस्य पञ्च संस्कृतविद्वांसः श्रीफलोत्तरीयदक्षिणाभिश्च सम्मानिताः।

अवसरेऽस्मिन् 19/08/2008 दिनाङ्के **संस्कृतकविसंगोष्ठी** अपि समायोजिता आसीद् यत्र महाकविभास्कराचार्यत्रिपाठिसहितैः प्रो. परमेश्वरनारायणशास्त्रि - डा. वेदनारायणचौधरी - डा. बोधकुमारझा - डा. हंसधरझा - डा. सुज्ञानकुमारमोहन्ति - डा. नारायणन् ई. आर्. - डा. रामचन्द्रजोईस - डा. निलिम्पत्रिपाठि-श्रीडावकेमहाभागैः हास्यशृङ्गारादिरसैः भावैश्च समन्वितानि स्वरचितकाव्यानि संश्राव्य समुपस्थितानां विदुषां छात्राणाञ्च मनोरञ्जनं कृतम्।




कविगोष्ठ्यां कवयः विद्वांसश्च

संस्कृतसप्ताहोत्सवेऽस्मिन् डा. सुज्ञानकुमारमोहन्तिमहाभागस्य संयोजकत्वे अन्तर्विद्यालयीयाः अन्तर्विश्वविद्यालयीयाश्च संस्कृतभाषण-श्लोकगान-शास्त्रीयवाक्स्पर्धाश्च अनुष्ठिताः, तत्र विजितप्रतियोगिनः समापनसमारोहे मुख्यातिथिना भूतपूर्वारक्षिमहानिदेशकेन 'महारानीलक्ष्मीबाई-भोपालजनकल्याणसमिति'पक्षतः सद्रव्यपुस्तकैः पुरस्कृताः।

संस्कृतसप्ताहमध्ये एव समागत-स्वातन्त्र्यदिनोत्सवः अपि वैभवेन परिसरे परिपालितः । 15 अगस्त, 2008 दिनाङ्के परिसरप्राङ्गणे समेषां परिसराध्यापकानां कर्मचारिणां छात्राणाञ्चोपस्थितौ आदौ परिसरस्य विशेषकार्याधिकारिणा ध्वजारोहणं कृतम् । ततः सर्वैः समस्वरेण भारतराष्ट्रगानं गीतम् । आचार्येण प.ना.शास्त्रिवर्येण सर्वे सम्बोधिताः । डा.ई.आर्.नारायणमहोदयेन संयोजितस्य एतस्य कार्यक्रमस्य अन्ते सर्वैः छात्रैः अध्यापकैः सह देशभक्तिगीतानि सस्वरं सानन्दं गीतानि ।

## लखनऊपरिसरे

18-08-2008 तः 20-08-2008 पर्यन्तं लखनऊ-परिसरे संस्कृतोत्सवः सम्पन्नः । संस्कृतोत्सवस्य उद्घाटनं विदधता प्राचार्य डा. एन्. आर्. कण्णन्महोदयेन श्रावणपूर्णिमायां संस्कृतदिवसानुष्ठानस्य पारम्परिकं महत्त्वं, संस्कृतसप्ताहावरणस्य आवश्यकतां च प्रतिपाद्य छात्राः सम्प्रेरिताः । छात्राणां कृते संस्कृतोत्सवमुपलक्ष्य विविधाः स्पर्धाः समायोजिताः आसन् ।

## जयपुरपरिसरे


मञ्चे उपविष्टाः प्राचार्यप्रभृतयः विद्वांसः

11-8-08 तः 16-8-08 यावत् संस्कृतसप्ताह-समारोहोऽनुष्ठितः । समारोहाङ्गतया आयोजितसभासु आचार्यः अर्कनाथचौधरी, आचार्यः वासुदेवशर्मा, डा. श्रीधरमिश्रः, डॉ. विजयपालशास्त्री, डॉ. रमाकान्तपाण्डेयः, डॉ. सन्तोषमित्तलः, डॉ. सुदेशकुमारशर्मा, डॉ. भगवतीसुदेशस्तथा चान्ये प्राध्यापकाश्छात्राश्च वक्तृरूपेणोपस्थिताः । छात्राणां कृते अवसरेऽस्मिन् विविधस्पर्धानामायोजनमभूत् । समारोहस्य सम्पन्नतासत्रे राष्ट्रपतिसम्मानितः श्रीमान् हरिराम आचार्यमहोदयः मुख्यातिथिपदमलमकरोत् । परिसरस्य आचार्यवरः डॉ. जगन्नारायणपाण्डेयमहोदयश्च सारस्वतातिथिपदं व्यभूषयत् । डॉ. वाय्.एस्. रमेशमहोदयेन संयोजिते एतस्मिन् कार्यक्रमे परिसरप्राचार्यः हिन्दकेसरी-महोदयः आध्यक्ष्यं निरवहत् ।

## गङ्गानाथझा-परिसरे

इलाहाबादस्थ-गङ्गानाथझा-परिसरे सितम्बरमासस्य 4, 5, 6 दिनाङ्केषु संस्कृतोत्सवः आयोजितः । उत्सवाङ्गतया संस्कृतच्छन्दोगान-प्रतियोगिता, संस्कृतगीतप्रतियोगिता, संस्कृत-वादविवादप्रतियोगिता, भाषणप्रतियोगिता, व्याकरण-साहित्यशास्त्रयोः चर्चाप्रतियोगिता, अन्त्याक्षरी, विद्वद्व्याख्यानम् इत्येते कार्यक्रमाः आयोजिताः आसन् । सितम्बर 6 दिनाङ्के अपराह्णे प्रवृत्ते विद्वद्व्याख्यान-पुरस्कारवितरण-कार्यक्रमयोः इलाहाबादविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः हरिदत्तशर्मा आध्यक्ष्यं निरूढवान् । सि.एम्.पी. डिग्री-महाविद्यालयस्य संस्कृतविभागाध्यक्षेण डा. आनन्दकुमारश्रीवास्तवेन 'संस्कृतभाषावाङ्मय' विषये सारगर्भितं भाषणमकारि । परिसरस्य प्रभारि-प्राचार्यया डा. शैलकुमारीमिश्रया अतिथीनां स्वागतकथनपुरस्सरं समारोहस्य प्रयोजनं स्पष्टीकृतम् । विविधप्रतियोगितासु विजयिभ्यः पुरस्काराः प्रदत्ताः । परिसरीय-प्रवाचकेन डा. जनार्दन-प्रसादमणिना सञ्चालितेऽस्मिन् कार्यक्रमे डा. विश्वम्भरनाथगिरिणा धन्यवादवचांसि व्याहृतानि ।

## मुम्बईपरिसरे

मुम्बईपरिसरे श्री क.जे. सोमैय्या केन्द्रीयसंस्कृतविद्यापीठे 13-8-2008 तः 19-8-08 पर्यन्तं संस्कृतसप्ताहः अनुष्ठितः । वैभवतया सम्पन्नमेनं कार्यक्रमम् आरम्भदिने डा. एस्.के. भवानीमहोदयः समुदघाटयत् । उद्घाटनकार्यक्रमे मुख्यवक्त्रीरूपेण समाहूतया डा. गौरीमाहुलीकर-महोदयया ऋग्वेदोद्धरणपुरस्सरं विशिष्टं भाषणं कृतम् । विविधोदाहरणपुरस्सरं तया सम्प्रेरणा दत्ता यत् 'वयं सर्वे कर्तव्यनिष्ठया, सेवाभावनया च संस्कृतकार्यं कुर्याम । यथाशक्ति यथामति लोककल्याणकार्ये सहभागिनो भवेम' इति । कार्यक्रमे क.सो.सं.पी.निदेशिका डा. कलाचार्या च छात्रान् सम्बोध्य सभां सफलाम् अकरोत् ।

सप्ताहात्मककार्यक्रमे आयोजित-विविधकार्यक्रमेषु कविसम्मेलनम् उल्लेखनीयं वर्तते । तत्र आचार्यः शुक्लमहोदयः, कला-राजा- योगिप्रभृतयः कवयः भागमगृह्णन् । सुविख्यातः दस्तगीरमहोदयः संस्कृतसप्ताहसमापनकार्यक्रमे विशिष्टवक्ता आसीत् ।

## सम्बन्द्धसंस्थायां संस्कृतसप्ताहः

रा.सं.संस्थानस्य आदर्शसंस्कृतमहाविद्यालय/शोधसंस्थानयोजनान्तर्भूतया उस्मानियाविश्वविद्यालयस्थित - संस्कृतपरिषद् (Sanskrit Academy) इत्यनया आन्ध्रप्रदेश-सर्वकारस्य संस्कृतिविभागेन, संस्कृतभारत्या च मिलित्वा अगस्तमासस्य 13 दिनाङ्कतः 19 यावत् हैदराबादनगरे

रवीन्द्रभारतीसभागारे संस्कृतसप्ताहः सवैभवम् आयोजितः। कार्यक्रमाङ्गतया संस्कृते वैविध्यपूर्णाः सांस्कृतिककार्यक्रमाः, विभिन्नस्तरीयच्छात्राणां कृते विभिन्नस्थानेषु स्पर्धाकार्यक्रमाः च सञ्चालिताः आसन्। प्रतिदिनं पूर्वाह्णे शास्त्रीयगोष्ठ्यः सायं सांस्कृतिककार्यक्रमाः च अभवन्। कार्यक्रमेषु भारतीयप्राशासनिकसेवा-(I.A.S.)-अधिकारिणः श्री फणिकुमारः, श्री सि.उमामहेश्वररावः, श्री कृष्णय्यः, श्री सि.वी.एस्.वेङ्कटरमणः, भारतीय-पुलिससेवा-(I.P.S.)- अधिकारिणः के.अरविन्दरावः, श्री पी.गोपीनाथरेड्डिः, श्री रेवतीनन्दन्, न्यायाधीशः श्री नरसिंहरेड्डिः, न्यायाधीशः श्री सोमयाजुलु, श्री राल्लबण्डि-कविताप्रसादः, दो. प्रभाकरशर्मा, लक्ष्मीनाथाचार्यः इत्यादयः समुपस्थिताः आसन्। सर्वविधान् उत्साहवर्धकान् कार्यक्रमान् वीक्ष्य, संस्कृतज्ञानां संस्कृताभिमानिनां सामाजिकानां च सन्दोहेन परिपूर्णं सभाभवनं च दृष्ट्वा विशिष्टातिथयः आनन्दिताः सन्तः संस्कृतस्य भविष्यम् उज्ज्वलं भवेदिति आशयं प्रकटितवन्तः इति संस्कृतपरिषदः निदेशकः श्रीनिवासवरखेडिमहोदयः संस्थानं सूचितवान्।

## छात्राणां क्रियाकलापाः

**शृङ्गेरी**

- नव्यन्यायशास्त्रि-द्वितीयवर्षस्य श्री राघवेन्द्रभट्टः, श्री सन्दीपकानेतकरः इत्येतौ, व्याकरणाचार्य-प्रथमवर्षस्य श्रीप्रमोदभट्टः च तमिलनाडुराज्यस्थया काञ्ची-कामकोटिपीठ-वेदवेदान्तशास्त्र-विद्वत्सभया सितम्बरमासे आयोजित-शास्त्रीयपरीक्षासु उत्तीर्णाः अभवन्।
- परिसरच्छात्रैः महत्या स्फूर्त्या 'ओणम्' इति कश्चन सांस्कृतिकः उत्सवः डा. राजन् महोदयस्य मार्गदर्शने परिसरे आचरितः। विभिन्नराज्येभ्यः आगताः परिसरीयच्छात्राः अत्र भागमूत्वा वैविध्यपूर्णसंस्कृतेः अनुभवं प्राप्य आनन्दिताः अभवन्। अवसरेऽस्मिन् समग्रं परिसरं छात्राः 'पूक्कलम्' इति कथ्यमान-पुष्परङ्गवल्ल्या अलङ्कृतवन्तः। श्रीशङ्करन् नम्पूतिरिपादः मुख्यातिथित्वेन समागतः आसीत्।
- विनायकभट्टः (मीमांसाचार्यद्वितीयवर्षच्छात्रः, शृङ्गेरी-परिसरः) संस्कृतभारती, तरुणोदयसभा इत्येताभ्यां संस्थाभ्यां कर्णाटकस्य शिवमोग्गा-नगरे 21-9-08 दिनाङ्के आयोजितायां राज्यस्तरीय-संस्कृतभाषणस्पर्धायां प्रथमं स्थानम् अधिगतवान्।
- शास्त्रिप्रथमवर्षीया विद्यार्थिनी कु. भारती प्राक्शास्त्रिस्तरे प्रथमस्थानप्राप्तिमुपलक्ष्य जुलैमासस्य पञ्चदशे दिनाङ्के अखिलभारतविद्यार्थिसमाख्यया समायोजिते भव्यसमारोहे प्रतिभापुरस्कारेण सभाजिता।

### इन्दौर-राष्ट्रियसंस्कृतनाट्यमहोत्सवः संस्थानच्छात्राः रङ्गमञ्चे व्यराजन्

उज्जयिनीस्थ-कालिदास-अकादम्याः, रा. सं.संस्थानस्य च संयुक्ततत्त्वावधाने मध्यप्रदेशे इन्दौर-नगरे 20-9-08 तः 22-9-08 पर्यन्तं प्रवृत्ते संस्कृतनाट्यमहोत्सवे संस्थानस्य गुरुवायूरुपरिसरस्य, लखनऊपरिसरस्य, शृङ्गेरीस्थ-राजीवगान्धीपरिसरस्य च छात्राः संस्कृतनाटकानि अभिनीतवन्तः। शृङ्गेरीपरिसरस्य छात्रगणेन अभिषेकनाटकं प्रस्तुतमासीत्। लखनऊपरिसरेण चण्डकौशिकम् गुरुवायूरपरिसरेण च मालविकाग्निमित्रं प्रस्तुतम्।

## अनौपचारिकसंस्कृतशिक्षणम्

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षमिवास्मिन्नपि वर्षे अखिलभारतस्तरे अनौपचारिकसंस्कृतशिक्षणकेन्द्राणि प्रारब्धानि। वर्षेऽस्मिन् सितम्बर-मासतः मार्चमासपर्यन्तं प्रथमदीक्षायाः द्वितीयदीक्षायाः च त्रैमासिककक्षाद्वयं सञ्चाल्यते।

संस्थानपरिसरेष्वपि दीक्षाकेन्द्राणि भविष्यन्ति। समग्रदेशे आहत्य **उपपञ्चदशसहस्रम् अध्येतारः** एतस्य अनौपचारिकशिक्षणस्य लाभं प्राप्नुयुः इति सम्भाव्यते। सितम्बर-मासतः आरब्धस्य त्रैमासिकशिक्षण- केन्द्राणाम् उद्घाटनप्रतिवेदनानि प्राप्यमाणानि सन्ति। द्वित्राणां केन्द्राणाम् उद्घाटन-कार्यक्रमस्य चित्राणि अवलोक्यन्ताम्।










# परिसरेषु विविधाः गतिविधयः

संस्थानपरिसरेषु नियताध्ययनाध्यापनकार्येण सह अध्ययनाध्यापनसम्बद्धाः इतरे ज्ञानवर्धकाः, स्फूर्तिदाः, प्रतिभाविकासकाः विविधक्रियाकलापा अपि यथासमयम् आयोज्यन्ते । तद्विषये वार्तासङ्ग्रहः अत्र अवलोक्यताम्--

## पुरी

श्रीसदाशिवपरिसरे जुलाईमासस्य षोडशदिनाङ्के शिक्षाशास्त्रविषयमुररीकृत्य विशिष्टव्याख्यानमाला समायोजिता। समायोजितायां व्याख्यानमालायां वाराणसीस्थस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविभागस्याध्यक्षः आचार्यः सुभाषतिवारिमहोदयः छात्रान् उदबोधयत् ।

## लखनऊ

- नूतनच्छात्रावासे छात्राणां प्रवेशोत्सवः

  20-07-2008 दिनाङ्के लखनऊपरिसरे नूतनच्छात्रावासे वास्तुशान्ति-सत्यनारायणपूजाद्यनुष्ठानपुरस्सरं छात्राः सोत्साहं प्राविशन् । अवसरेऽस्मिन् परिसरप्राचार्यः डा. एन्.आर्.कण्णन्महोदयः, परिसरीयाध्यापकाः छात्राश्च उपस्थिताः आसन् ।

- परिसरस्य निरीक्षणम्

  31-07-2008 दिनाङ्के संस्थानस्य तदानीन्तन-प्रभारी कुलपतिः श्रीमती डा. अनिताजैनभटनागरमहोदया परिसरं निरीक्ष्य परिसरसम्बद्धेषु विविधविषयेषु परामर्शं प्रायच्छत् ।

- 05-08-2008 दिनाङ्के प्राचार्यस्य आध्यक्ष्ये परिसरीयशोधसमितेः उपवेशनं सम्पन्नम् ।

- 15-08-2008 दिनाङ्के यथासम्प्रदायं स्वतन्त्रतादिवसः समनुष्ठितः ।

## जयपुरम्

अगस्तमासस्य अष्टमे दिनाङ्के भारतीयफलितज्यौतिषस्य भारतीयवास्तुशास्त्रस्य च विषये परिचयपाठ्यक्रमः प्रारब्धः। अगस्तमासस्य अष्टमदिनाङ्के फलितज्योतिषपाठ्यक्रमस्य उद्घाटनसत्रे परिसरीयः ज्योतिषाचार्यः वासुदेवशर्मा कार्यक्रमस्योद्देश्यं विवृतवान् । प्राचार्यस्य डा. हिन्दकेसरिणः आध्यक्ष्ये प्रवृत्ते तस्मिन् उद्घाटनसत्रे मुख्यातिथित्वं जगद्गुरुरामानन्दाचार्यसंस्कृतविश्व-विद्यालयस्य ज्यौतिषिकः डा. विनोदशास्त्री निरवहत् । अगस्तमासस्य 25 दिनाङ्कतः डा. ईश्वरभट्टस्य पर्यवेक्षणे प्रचलतः वास्तुशास्त्रपरिचयपाठ्यक्रमस्य उद्घाटनं परिसरस्य सेवानिवृत्तविदुषा डा. सतीशकौलावतमहोदयेन कृतमासीत् ।




**मञ्चे उपविष्टाः सुरेशकुमारशर्मा, हिन्दकेसरी, विनोदशास्त्री, भाषमाणः वासुदेवशर्मा च।**

## मुम्बई

- संस्कृतसम्भाषणशिविरम्

  04-8-2008 तः 10-8-2008 पर्यन्तं रा.सं.संस्थानस्य मुम्बई-परिसरे क.जे. सोमैय्या केन्द्रीयसंस्कृतविद्यापीठे संस्कृतसम्भाषण-शिविरमेकम् आयोजितम् यत्र जिज्ञासवः संस्कृतसम्भाषणशिक्षणं प्राप्तवन्तः । श्री दीपेशकतिरामहोदयेन इदं सम्भाषणशिविरं सञ्चालितम् । शिविरसम्पूर्तिकार्यक्रमे डा. लोकमान्यमिश्रमहोदयः, परिसरप्राचार्यः डा. कमलचन्दयोगी, परिसरप्राध्यापकाः छात्राश्च उपस्थिताः आसन् ।

- जीवनविद्याशिविरम्

  मानवनैतिकमूल्यविषये, सामाजिकदायित्वविषये, जीवनकलाविषये च चिन्तन-मथनपुरस्सरं व्यक्तित्वविकासाय चित्तस्थैर्यपुरस्सरं जीवनाभ्यासाय च मुम्बई-परिसरेण पञ्चदिनात्मकं जीवनविद्याशिविरम् आयोजितमासीत् । श्रीनरेन्द्र-पाठकाभ्यां सञ्चालितमेतत् शिविरं श्रीमता जयन्तवर्मामहाभागेन समुद्घाटितमासीत् । उपदश जनाः एतस्य शिविरस्य प्रयोजनं प्राप्तवन्तः । समापनसमारोहे विशिष्टातिथिरूपेण डा. निरुभगिनी उपस्थिता आसीत् । शिविरार्थिभ्यः विचारप्रबोधकानि पुस्तकानि प्रदत्तानि ।

- शिक्षकदिवसः

  परिसरेण 5-9-08 दिनाङ्के समायोजिते शिक्षकदिवससमारोहे डा. एस्.के. भवानीमहोदयः मुख्यातिथिपदमलङ्कृतवान् ।

## शृङ्गेरी

- **शिक्षकदिवसः**

डा. सर्वेपल्लिराधाकृष्णन्-महोदयस्य जयन्तीमुपलक्ष्य परिसरेण सितम्बरमासस्य पञ्चमे दिने परिसरे समायोजिते शिक्षकदिवसे गोकर्ण-संस्कृतमहापाठशालायाः पूर्वप्राचार्यः कविवरः विद्वान् गुण्डुभी-गणपय्यहोल्ल-महोदयः मुख्यातिथिपदं विभूष्य सर्वान् उदबोधयत्। एतस्मिन् अवसरे, संस्कृतशिक्षणविषये विहितसेवाम् उपलक्ष्य विद्वान् श्रीवासुदेवजोयिसः, विद्वान् श्री महेशकाककुकरश्च सम्मानितौ। अयं सभाकार्यक्रमः छात्रैः परिसराध्यापकयोः रामचन्द्रलवालाजी - भगवान् सामन्तरायः इत्यनयोः मार्गदर्शने सुसम्पादितः। प्रसङ्गेऽस्मिन् शिक्षकाः अन्त्याक्षरीत्यादिकार्यक्रमेषु सोत्साहं भागमगृह्णन्।

- **पूर्वच्छात्राणाम् उपवेशनम्**

परिसरस्य पूर्वच्छात्राणाम् एकं सौहार्दमेलनम् उपवेशनं च रा.गा. परिसरे सितम्बर 13 दिनाङ्के सम्पन्नम्। तत्र उपस्थितैः सक्रियैः छात्रवरैः परिसरहितैषिभिः स्वमातृसंस्थायाः सर्वतोमुखविकासाय बद्धश्रद्धः छात्रवरसङ्घः सङ्कल्पितः। तस्य च 'रा.गा. परिसरस्य छात्रवर-सङ्घस्य' विधिवदुद्घाटनं सितम्बरमासस्य 24 तमे दिने सम्पन्नम्।

- **'अपूर्वा' भित्तिपत्रिका अनावृता**

छात्राणां प्रतिभाप्रकाशनाय परिसरे अपूर्वा-नाम्नी काचित् भित्तिपत्रिका परिसरे समारब्धा। एतस्याः उद्घाटनं डा. कमलचन्द्रयोगिवर्येण कृतम्। एषा मासिकी भित्तिपत्रिका। अत्र छात्रैः लिखिताः सदभिरुचिप्रेरकाः, उत्तमाः विषयाः प्रकाशिताः भवेयुः।

- **योगासनशिबिरम्**

दशदिनात्मकं 'पतञ्जलियोगशिबिरम्' परिसरे आयोजितम्। अत्र परिसरस्य शिक्षाशास्त्रिकक्ष्याच्छात्रः निपुणः योगशिक्षकः श्री जयकृष्णः पञ्चाशतः छात्राणां शिक्षकाणां च योगाभ्यासं कारितवान्। एतस्य शिबिरस्य समारोपकार्यक्रमः 25-9-08 दिनाङ्के प्रवृत्तः। डा. सूर्यनारायणभट्टेन सञ्चालितायामस्यां समारोपसभायां अध्यक्षीयभाषणं कुर्वता परिसरप्राचार्येण आचार्येण रामानुजदेवनाथेन योगशिक्षायाः आवश्यकता महत्त्वं च प्रत्यपादि। पतञ्जलिना भगवद्रामानुजेन च योगबलेन साधितकार्याणि तेन सोदाहरणं विवृतानि।

- **श्रीशारदा-विशिष्टव्याख्यानमाला**

परिसरे आयोजितायां विशिष्टव्याख्यानमालायां 'संस्कृतवाङ्मये वैज्ञानिकता' इति विषयमधिकृत्य तिरुपतिस्थ-श्रीवेङ्कटेश्वर-वैदिकविश्वविद्यालयस्य कुलपतिः आचार्यः सन्निधानं-सुदर्शनशर्ममहोदयः व्याख्यानमकरोत्। उपर्युक्तव्याख्यानमालायाः एव चतुर्थं व्याख्यानपुष्पं 22-9-08 दिनाङ्के आचार्य-कृष्णमूर्ति-जी.कूर्से-महोदयः समार्पयत्। परिसरप्राचार्यः उभावपि विद्वांसौ तत्तत्प्रसङ्गे श्रीफलोत्तरीयादिभिः सभाजितवान्।

- **श्रमदानशिबिरम्**

शृङ्गेरीपरिसरच्छात्राः अध्यापकाश्च स्वयं सेवा-भावनया 20-9-08 दिनाङ्के श्रमदानकार्ये भागं वहन्तः परिसरस्वच्छताम् अकुर्वन्। परिसरीयः अध्यापकः डा. भगवान् सामन्तरायः प्राचार्यस्य मार्गदर्शने कार्यमिदं समयोजयत्।

- **वाक्यार्थपरिषद्**

परिसरस्य वाक्यार्थपरिषदः तृतीयसत्रं 23-9-08 तमे दिनाङ्के आचार्यस्य ए.पि. सच्चिदानन्दस्य मार्गदर्शने प्रवृत्तम्। तत्र डा. चन्द्रकला आर्. कोण्डी, डा. वेङ्कटरमणभट्टः, श्रीगणेशपण्डितः, श्री शङ्करहेब्बारः इत्येते चत्वारः विविधविषयेषु शास्त्रार्थं प्रास्तुवन्।

- **अभिभावक-शिक्षकसङ्घः**

परिसरस्य अभिभावक-शिक्षकसङ्घः पुनर्घटितः यस्य च उद्घाटनं 26-9-08 दिनाङ्के समभवत्।

## जम्मू

रणवीरपरिसरे जूनमासस्य 13-14 दिनाङ्कयोः संसदीय-राजभाषा-निरीक्षण-समितेः गोष्ठी आयोजिता। तत्र समित्याम् इमे अधिकारिणः आसन् – हरियाणा-लोकसभायाः उपाध्यक्षः श्रीजयप्रकाशः, पश्चिमबङ्गालस्य लोकसभायाः संयोजकः श्री मोहम्मदसलीमः, उत्तरप्रदेश-हिमाचलप्रदेश-मध्यप्रदेश-राजस्थानराज्यानां लोकसभा-सदस्याः श्री गान्धीआजादः, श्री सन्तोषगङ्गवारः, श्री थावरचन्दगेहलोतः, श्री गिरिधारीलालभार्गवः इत्येते, समितिसचिवा श्री पूनमजुनेजा, वरिष्ठानुसन्धानाधिकारी श्री सुरेन्द्रमोहननय्यरः, वार्ताहरः श्री सतीशकुमारः इत्येते च आसन्। एतानतिरिच्य मा.सं. विकासमन्त्रालयस्य उच्चशिक्षानिदेशिका श्रीमती रश्मिचौधरी, राजभाषानिदेशकः श्री नरेशकुमारः, संस्थानस्य प्रभारीकुलसचिवः श्री चन्दनसिंहकत्यालः, हस्तलेखसङ्ग्रहसंरक्षण-परियोजनाधिकारिणी श्रीमती शुक्लामुखर्जी, परिसरप्राचार्यः आचार्यः विश्वमूर्तिशास्त्री च उपस्थिताः आसन्। समितिसदस्याः, अत्र परिसरे राजभाषाप्रयोगान् संस्कृतवातावरणं च विलोक्य प्रसन्ना जाताः।

## अध्यापकानां नवीनानि प्रकाशनानि

- डा. हंसधरझा: (ज्यौतिषविभागाध्यक्ष:, भोपालपरिसर:) "सपरिशिष्टां गोलपरिभाषां" प्राकाशयत्। संस्कृतहिन्दीटीकाभ्यां विविधछेद्योदाहरणैश्च भूषितोऽस्ति एष ग्रन्थ:।
- डा. ब्रजेश्वरमिश्र: (धर्मशास्त्रविभागाध्यक्ष:, सदाशिवपरिसर:, पुरी) मुक्तिचिन्तामणिनामकं पुस्तकं प्रकाशितवान्।
- रणजित्कुमारशर्मन् (वरिष्ठप्राध्यापक:, सदाशिवपरिसर:, पुरी) पुस्तकत्रयं [आनन्दमयाधिकरणतत्त्वालोक:, वेदान्तशास्त्रपरिचय:, मोक्षस्वरूपनिर्णयश्च] प्रकाशितवान्।
- डा. श्रीदेव्या (साहित्याध्यापिका, राजीवगान्धीपरिसर:) विरचित: 'कूटियाट्टकला' नामक: ग्रन्थ: संस्थानस्य आर्थिकसाहाय्येन प्रकाशित: आगस्ट्-मासस्य चत्वारिंशे दिनाङ्के परिसरवार्षिकसभायां परिसरप्राचार्येण समाविष्कृत: च।

## अभिनन्दनम्

### रूसदेशे अतिथ्याचार्य: डा. शिशिरकुमारपाण्डेय:



भारतसर्वकारस्य विदेशमन्त्रालयगतया भारतीय-सांस्कृतिक-सम्बन्ध-परिषदा डॉ. शिशिरकुमारपाण्डेय: रूसदेशे मास्कोनगरे जवाहरलाल-नेहरू-सांस्कृतिककेन्द्रे अतिथि-आचार्य: (Visiting Professor) इति पदे वर्षद्वयावधिके प्रतिनियुक्त:। संस्थानस्य केनापि प्राध्यापकेन एतादृश: सम्मान: इदम्प्रथमतया लब्ध:। अस्या: उपलब्धे: कृते डॉ. पाण्डेय: राष्ट्रियसंस्कृतसंस्थानस्य प्रबन्धमण्डलेन वर्धापित:। कनिष्ठशोधवृत्ति-राष्ट्रियशिक्षापरीक्षोत्तीर्ण: (J.R.F, NET) पाण्डेय: 1987 ई. वर्षत: अद्यावधि राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य पुरीपरिसरे व्याख्यातृरूपेण अध्यापितवान्। सम्प्रति लखनऊपरिसरे च प्रवाचकपदे अध्यापयन्नस्ति। हिन्दीविषयके पदे नियुक्त: किन्तु हिन्द्या सह संस्कृतेन भारतीयां संस्कृतिं वैदिकवाङ्मयेतिहासं चापि पाठयति।

पाण्डेयवर्यस्य सम्पादकत्वे भारतीयसंस्कृति-साहित्य-लोककला-विज्ञानाद्याधारिता "ज्ञानायनी"-नाम्नी त्रैमासिकी पत्रिका चतुर्भिर्वर्षै: प्रकाशिता भवति। पत्रिकाया: विविधेष्वङ्केषु 'तन्त्रं ज्योतिषं' चेति चतुर्भिर्भागै:, "बौद्ध-संस्कृति" इति विषय: चतुर्भिर्भागै: "आयुर्वेद:-ज्योतिषम्" इति विषयश्च भागद्वयेन प्रकाशित:। 'समाज और संस्कार' तथा 'संस्कृत के मनीषी' इत्यादिविशेषाङ्काश्चापि तत्र प्रकाशिता:। उत्तरप्रदेश-हिन्दीसंस्थानस्य सच्चिदानन्द-हीरानन्द-वात्स्यायन- 'अज्ञेय' इति नामितपुरस्कारेण सम्मानितस्य श्रीपाण्डेयस्य नैके ग्रन्था: शोधलेखाश्च प्रकाशिता: सन्ति। बहुविधविशिष्टशैक्षिकसत्रेषु सहभागितां सन्दधानश्चासौ सांस्कृतिकेषु समुद्योगेषु सोत्साहं प्रवर्तते। संस्थानपरिवारेण अभिनन्द्यते श्रीपाण्डेय:।

### पण्डितपरिषदि पुरस्कृत: डॉ. व्रजभूषण: ओझा:

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य व्याकरणविभागे व्याख्यातृपदं विभूषयन् "डा.व्रजभूषण: ओझा:" हरियाणास्थकुरुक्षेत्रविश्वविद्यालये जुलाईमासस्य 28, 29, 30 दिनाङ्केषु सम्पन्ने चतुश्चत्वारिंशत्तमे अखिलभारतीयप्राच्यविद्यासम्मेलने (AIOC) पण्डितपरिषदि भागभूत्वा 'श्रेष्ठपण्डित'-पुरस्कारं प्राप्नोदिति सम्पूर्णो राष्ट्रियसंस्कृतसंस्थानपरिवार: आत्मनो गौरवं मनुते, पुन: लब्धपुरस्कारस्य डॉ.ओझामहोदयस्य दीर्घायुष्ट्वनैरुज्यपूर्विकां सफलां सारस्वतीं नवनवाभ्युन्नतिं च कामयते।

### संस्थानप्रशस्ति:

भारतकल्पस्पन्दनप्रमाणं संस्कृतसंस्कृतिविधायकम्
आर्षमनीषाप्रतिभूर्जयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 1 ॥
निगमागमपुराणरामायणमहाभारताऽमृतान्वितम्
काव्यनाट्यसङ्कुलं विजयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 2 ॥
संज्ञपयद् विश्वैकनीडतां विश्वबन्धुतां प्रसारयत्
श्रेयोमार्गे शिवद् विजयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 3 ॥
तमसो ज्योतिर्गमयन्मनुजानमृतं मृत्योरुपानयत्
असत: सच्च तन्वयञ्जयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 4 ॥
भारतविश्वगुरुत्वसाधकं भाषासंस्कृतिसंवादै:
सर्वधर्मसमवायि विजयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 5 ॥
अध्ययनैर्बोधाऽऽचरणाभ्यां सदर्थयच्छास्त्रज्ञानम्[1]
राष्ट्रं जगति कीर्तयञ्जयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 6 ॥
अर्थधर्मकामापवर्गसन्तुलिताध्वानं निदर्शयत्
सुरवाणीजयपीठं जयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 7 ॥
ज्ञानविवेकबन्धुताममताऽध्यात्मपात्रकौर्माणवकान्
महामानवान् विदधज्जयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 8 ॥
मानितमिदं विश्वविद्याभवनं नृपधानीहृदि[2] स्थितम्
सद्विद्योपासनाविलसितं राष्ट्रियसंस्कृतसंस्थानम् ॥ 9 ॥
उत्तरदक्षिणपूर्वपश्चिमस्थितै: परिसरैरनारतम्
भारतैक्यचेतनां वितनुते राष्ट्रियसंस्कृतसंस्थानम् ॥ 10 ॥
सत्कर्मणि सत्पथे सदुदये सद्धर्मे सद्विचारणे
सद्वृत्ते योजकं विजयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 11 ॥
भारतकीर्तिमन्दिरं पूतं दिव्यमिदं शारदागृहम्
नवास्पदं सन्ततं विजयते राष्ट्रियसंस्कृतसंस्थानम् ॥ 12 ॥

–मिश्रोऽभिराजराजेन्द्र:

1. सदर्थयद् दिव्यज्ञानमित्यपि पाठो ग्राह्य: सन्दर्भाक्षरकाठिन्ये।
2. राजधानीहृदि दिल्लयामिति।

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.I No. I Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007